# SANSKRIT SCHOLARSHIP EXAMINATION 2012-2013
[ACADEMIC SCHOOLS]

| REGISTER NO |
| --- |
| |

Time: 60 Minutes
Max.Score: 50

D -VII

8x1=8

1-10 **समुचितमुत्तरं कोष्ठान्निर्धार्य लिखत ।**

१ ‘श्रीनारायणविजयः’ इत्यस्य महाकाव्यस्य रचयिता कः ? ।
(मुतुकुलं श्रीधरः, बालरामण्णिक्कर्, श्रीधराचार्यः)

.........................................................................

२ ‘विद्यया अमृतमश्नुते’ - वाक्यमिदं कस्याः उपनिषदः उद्धृतम् ?
(मुण्डकोपनिषदः,कठोपनिषदः,ईशावास्योपनिषदः)

.........................................................................

३ ‘लक्षम्’ इत्यस्मिन् पञ्चशून्यानि सन्ति। सहस्रमित्यस्मिन् कति शून्यानि वर्तन्ते ?
(त्रीणि, चत्वारि, पञ्च)

.........................................................................

४ अस्मिन् वर्षे आशान् स्मारककवितापुरस्कारेण समादृतः कः ?
(अक्कित्तम्,श्रीकुमारन् तम्पी, विष्णुनारायणन् नम्पूतिरि)

.........................................................................

५ ‘अस्’ धातोः लटि प्रथमपुरुषद्विवचने रूपं किम् ?
(स्थ, स्तः, स्थः)

.........................................................................

६ ‘कादम्बरी’ संस्कृतगद्यकाव्यं भवति। अस्य कर्ता - ?
(भट्टनारायणः, नारायणभट्टः, बाणभट्टः)

.........................................................................

७ अधः प्रदत्तेषु ल्यबन्तमव्ययं किम् ?
(चिराय, अह्नाय,.आदाय)

.........................................................................

८ संस्कारवाहिनी इति प्रसिद्धा केरलीयनदी ?
(निला, गोदावरी,गङ्गा)

.........................................................................

2x1=2

9-10 **संख्यां संस्कृताक्षरैः लिखत।**

९ 89 ..........................................

१० 56 ..........................................

11-12 **सर्वाण्यक्षराणि उपयुज्य एकं पदं लिखत।** 2x1=2

११ सं के ली तिः य स्कृ र ..........................................

१२ कु सु र मा विः क ..........................................

13-14 **संख्या रूपेण लिखत।** 2x1=2

१३ द्वादशोत्तरद्विसहस्रम् ..........................................

१४ सप्तचत्वारिंशदुत्तरनवशताधिकसहस्रम् ..........................................

15-16 **एकं पदं लिखत।** 2x1=2

१५ पिता च पुत्रः च। ..........................................

१६ आतपाद् त्रायते इति ..........................................

17-18 **पदच्छेदं लिखत।** 2x1=2

१७ तस्मिन्नेव। ..........................................

१८ स्वीकृत्याद्य ..........................................

19-20 **किं गणे नान्तर्भवति इति लिखत?** 2x1=2

१९ व्रीहिः,गोधूमः,मयूरः,तण्डुलः ..........................................

२० समुद्रः,क्षितिपतिः,सरित्पतिः,पारावारः ..........................................

21-25 **प्रश्नानामुत्तराणि लिखत।** 5x1=5

२१ प्रथमज्ञानपीठपुरस्कारविजेता केरलीयः कः?..........................................

२२ मलयालमसर्वकलाशालायाः उपकुलपतिः कः? ..........................................

२३ भारतस्य राष्ट्रियपशुः कः? ..........................................

२४ 'कृष्णाय' इत्यस्य विभक्तिः का? ..........................................

२५ नाट्यशास्त्रं केन विरचितम्? ..........................................

26-27 **वाक्ये योजयत।** 2x2=4

२६ सार्धम् ..........................................................................

२७ प्रभूतम् ..........................................................................

28-31 **यथोचितं योजयत।** 4x1=4

| | | |
|---|---|---|
| २८ ऋतुसंहारः | वेदाङ्गम् | २८ .................................. |
| २९ अष्टाङ्गहृदयम् | गौतमः | २९ .................................. |
| ३० व्याकरणम् | कालिदासः | ३० .................................. |
| ३१ अहल्या | वाग्भटः | ३१ .................................. |
| | भारविः | |

32-33 रेखाङ्कितपदस्य उचितरूपेण वाक्यं शुद्धं कुरुत। 2x2=4

३२ बाला: विद्यालयस्य बहिः क्रीडन्ति। ........................................

३३ हिमालये सर्वत्र हिमः दृश्यते ........................................

34 प्रदत्तं विषयमाधारीकृत्य पञ्च वाक्यानि लिखत। 1x5=5

३४ शुचित्वकेरलम्

35-38 खण्डिकां पठित्वा प्रश्नानाम् उत्तरं लिखत। 4x1=4

ब्रह्मणः लब्धवरः वृत्रः नाम दानवो देवान् अपीडयत्। तदा देवाः विधातारं सम्प्राप्य स्वकीयां कष्टां दशां न्यवेदयन्। देवप्रार्थनां श्रुत्वा स्वयम्भूः वृत्रवधोपायम् उपदिदेश। भवन्तः दधीचिमृषिम् उपगम्य तस्यास्थीनि याचन्ताम्। तैरस्थिभिः निर्मितेन वज्रायुधेनैव वृत्रः हन्तुं शक्यः इति।

३५ कः देवान् अपीडयत्?

........................................................................

३६ वज्रायुधः कैः निर्मितः?

........................................................................

३७ ब्रह्मा इत्यस्य समानार्थकं एकं शब्दं खण्डिकातः चित्वा लिखत।

........................................................................

३८ खण्डिकायां प्रयुक्तं तुमुन्नन्तमव्ययं किम्?

........................................................................

4x1=4

39 **मातृभाषया विवर्तयत।**

भरतनाट्यं दक्षिणभारतेषु प्रचुरप्रचारभूतं नृत्यरूपं भवति। नाट्यशास्त्रमनुसृत्य आसूत्रितमिदं कलारूपम्। भावरागतालानां मेलनमत्र द्रष्टुं शक्यते। नृत्यमिदं कर्णाटिक् सङ्गीतस्य साहाय्येन रङ्गेषु अवतार्यते।

# SANSKRIT SCHOLARSHIP EXAMINATION 2011-12
## ACADEMIC SCHOOLS

Std: VII

Reg.No: [ ]

Time :1 hr
Marks: 50

1–5 समुचितमुत्तरं कोष्ठात् निर्धार्य लिखत। 5x1=5

1. वृत्रासुरं हन्तुम् इन्द्रः कस्य अस्थीनि अयाचत?
   (अगस्त्यस्य, दधीचेः, वसिष्ठस्य) ..................................................।
2. "यदि अहं यवागूपात्रम् अधः अस्थापयिष्यं तर्हि ते सर्वे निराहाराः अभविष्यन्"
   –कस्य वचनमिदम् ?
   (चट्टम्पिस्वामिनः, नारायणगुरोः , विवेकानन्दस्य)........................................।
3. शरीरस्य मनसः च स्वास्थ्याय उचितः आहारः कः?
   (प्रियाहारः ,हिताहारः, विरुद्धाहारः) ..................................................।
4. श्रीकृष्णविलासकाव्यं केन विरचितम्?
   (पून्तानं नम्बूतिरिणा, वाल्मीकिना, सुकुमारकविना)....................................।
5. रामायणमासः कः?
   (कर्किटकमासः, मिथुनमासः, वृश्चिकमासः)............................................।

6–7 संशोध्य लिखत। 2x1=2

6. राधा पाठः अपठत्। ..................................................................।
7. छात्राः पुस्तकम् अपश्यत् ।.............................................................।

8–9 सन्धिं कुरुत। 2x1=2

8. न +अभवत् =.......................................................।
9. गावः + च =.......................................................।

10–11 अक्षराणि क्रमीकृत्य लिखत। 2x1=2

10. ता य क लो हि ........ ..................................................।
11. भ ते शो ........ ..................................................।

12–13 अक्षरैः लिखत। 2x1=2

12. 58= ..................................................................।
13. 80= ..................................................................।

14–15 संख्यारूपेण लिखत। 2x1=2

14. त्रिषष्टिः ............................................ ।

15. एकोनविंशतिः ............................................ ।

16–17. स्ववाक्ये योजयत। 2x1=2

16. बहिः ............................................................................................ ।

17. चेत् ............................................................................................ ।

18–19 कोष्ठस्थितस्य पदस्य उचितविभक्तिप्रयोगेण रिक्तस्थानानि पूरयत। 2x1=2

18 . शुकः ............................... अन्तः वर्तते। (नीडम्)

19. .......................... भवान् आगच्छतु। (सतीशः)

20–24 यथोचितं योजयत। 5x1=5

| | | |
|---|---|---|
| 20 | सलिलम् | सामर्थ्यम् |
| 21 | द्विजः | राष्ट्रम् |
| 22 | देशः | जलम् |
| 23 | दुःखम् | विप्रः |
| 24 | निपुणता | मनः |
| | | आकाशः |

25–29 खण्डिकां पठित्वा अधोदत्तानां प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत। 5x1=5

महाकविषु कालिदासः प्रथमगणनीयः वर्तते। तस्य कृतयः विश्वसाहित्ये महत्वपूर्णं स्थानं वहन्ति। तेन रचितम् रघुवंशं कुमारसम्भवं चेति महाकाव्यद्वयं पञ्चमहाकाव्येषु अन्तर्भवति। तस्य काव्यरचनाशैली अत्यन्तम् आकर्षिका अस्ति। "उपमा कालिदासस्य" इति उक्तिः प्रसिद्धा खलु? षण्णाम् ऋतूनां वर्णनात्मकम् ऋतुसंहारं तेन रचितं खण्डकाव्यं भवति। सः विक्रमादित्यस्य राजसभां अलङ्करोति स्म।

25. कालिदासेन रचितं खण्डकाव्यं किम्?

............................................................................................ ।

26. पञ्चमहाकाव्येषु अन्तर्भूतं तस्य काव्यद्वयं किम्?

............................................................................................ ।

27, कालिदासः कस्य राजसभाम् अलङ्कृतवान्?

.................................................................................................।

28. ऋतुसंहारे केषां वर्णनं दृश्यते?

.................................................................................................।

29. कालिदासम् अधिकृत्य प्रसिद्धा उक्तिः का?

.................................................................................................।

30. **परोपकारस्य** महत्वप्रतिपादकं किमपि सुभाषितं लिखत। 1x2=2

.................................................................................................

.................................................................................................।

.................................................................................................

.................................................................................................।।

31–35 प्रादेशिकभाषायाम् अनुवदत। 5x1=5

31. स्वगृहस्य स्थाने मणिमन्दिरं दृष्ट्वा कुचेलः अद्भुतस्तब्धः अभवत्।

.................................................................................................।

32.स्वामी विवेकानन्दः विश्वसञ्चारं कृत्वा धर्मप्रचारम् अकरोत्।

.................................................................................................।

33.आधुनिककेरलस्य शिल्पिषु श्रीनारायणगुरोः महत्वपूर्णं स्थानमस्ति।

.................................................................................................।

34.केरलराज्यस्य भार्गवक्षेत्रम् इति नामान्तरम् अस्ति।

.................................................................................................।

35. संस्कृतोत्सवेषु छात्राः सोत्साहं भागं वहन्ति।

.................................................................................................।

36. कोष्ठात् पदानि चित्वा रिक्तस्थानानि पूरयत। 4x1=4

(सः, अधः, आसीत्, तं)

एकः काकः..............................। एकदा..............................एकं मांसखण्डं प्राप्तवान्। ....................................गृहीत्वा सः कस्मिंश्चित् वृक्षे उपविष्टवान्। वृक्षस्य...........एकः शृगालः अपि आसीत्। सोपि मांसाहारे तत्परः अभवत्।

37-39 एकं पदं लिखत। 3x1=3

37. पातुम् इच्छा ............................................................।

38. दुर्लभस्य भावः ............................................................।

39. माता देवता यस्य सः ......................................................।

40-41 किं गणे नान्तर्भवति? 2x1=2

40. अग्निदेवः, अतिथिदेवः, वायुदेवः, इन्द्रदेवः ..............................................।

41. पेयम्, गेयम्, खाद्यम्, चोष्यम् ..........................................................................

42-43. पदच्छेदं कुरुत। 2x1=2

42. जालान्मुक्ताः = ....................+.....................

43. आयुधेनैव =.......................+.....................

44.पदप्रश्नं पूरयत 3x1=3

**दक्षिणं प्रति** - 1. श्रीशङ्करस्य जन्मस्थलम्।

3. धेनुः एतत् खादति।

**अधः** - 2. समुद्रजलस्य रसः।

| | | |
|---|---|---|
| 1 | 2 | |
| | | |
| 3 | | |

-- -- --

# SANSKRIT SCHOLARSHIP EXAMINATION 2010 - 11

S.S.U.S. ACADEMIC & SANSKRIT SCHOOLS

Std: VII Reg. No. [ ] Time: 1 hr

Marks: 50

1 - 20 समुचितमुत्तरं कोष्ठात् निर्धार्य लिखत - 20x1=20

1. "वन्दे वाल्मीकिकोकिलम्" - अत्र कर्तृपदं किम्? (वन्दे, माम्, अहम्) ..........................।
2. कुमारनाशान् महाभागेन रचितं रामायणम् किम्? (रामचरितम्, मालिरामायणम्, बालरामायणम्) ..................................।
3. भारतसर्वकारस्य औद्योगिकी लिपी का? (तमिल्, देवनागरी, पाली) ..........................।
4. "अहिंसादिनम्" - इति प्रसिद्धं दिनं किम्? (जनुवरि 30, आगस्त् 15, ओक्टोबर् 2) ....................।
5. अधोदत्तेषु स्मृतिकारः कः? (चाणक्यः, याज्ञवल्क्यः, विशाखदत्तः) ............................।
6. कालिदासः कस्मिन् काव्ये रामायणकथां पूर्णत्वेन प्रतिपादयति? (मेघदूते, कुमारसम्भवे, रघुवंशे) .............................।
7. जलमार्गेण गन्तुं योग्यं यानं किम्? (शिबिका, नौका, धूमयानम्) .............................।
8. 'रामकृष्णमिषन्' - इति प्रसिद्धायाः संस्थायाः स्थापकः कः? (स्वामी चिन्मयानन्दः, स्वामी विवेकानन्दः, राजाराम् मोहनराय्) ............................।
9. 'श्रीकृष्णकर्णामृतम्' नाम स्तोत्रकाव्यं केन विरचितम्? (गुरुकुमारकविना, पून्तानद्विजेन, लीलाशुकेन) ............................।
10. भारते प्रथमनोबेल्पुरस्कारजेता कः? (रवीन्द्रनाथटागोर्, जी. शङ्करकुरुप्प्, सत्यव्रतशास्त्री) .............................।
11. अधोदत्तेषु विरुद्धाहारः कः? (तक्रेण समं लवणम्, मत्स्येन समं क्षीरम्, क्षीरेण समं मधुरम्) .............................।
12. भारतस्य राष्ट्रियफलं किम्? (आम्रम्, पनसम्, नारिकेलम्) .............................।
13. 'प्रमाणम्' - इति पदस्य अर्थः कः? (नमस्कारः, आधिकारिकरेखा, परिणामः) .............................।
14. 'सन्तोष् ट्रोफी' - केन क्रीडनेन सम्बद्धं भवति? (पादकन्दुकक्रीडनेन, होक्कीक्रीडनेन, क्रिक्केट् क्रीडनेन) .............................।

(P.T.O.)

15. 'एतन्मित्रम्' - इति शब्दस्य विश्लेषितरूपं किम्? (एत + न्मित्रम्, एतत् + मित्रम्, एतन् + मित्रम्) ............................।

16. मलयालभाषापिता कः? (ए.आर्. राजराजवर्मा, कुमारनाशान्, एलुत्तच्छन्) ............................।

17. लोकमान्यबालगङ्गाधरतिलकेन विरचितं भगवद्गीताभाष्यं किम्? (गीतारहस्यम्, गीतार्थबोधिनी, अनासक्तियोगम्) ............................।

18. 'आश्चर्यचूडामणिः' - इति विश्रुतस्य ग्रन्थस्य कर्ता कः? (शङ्कराचार्यः, शक्तिभद्रः, कुलशेखरवर्मा) ............................।

19. ऐ.सी. चाक्कोमहाभागेन कैरल्यां विरचितः संस्कृतव्याकरणग्रन्थः कः? (मणिदीपिका, लघुपाणिनीयम्, पाणिनीयप्रद्योतम्) ............................।

20. नाट्यशास्त्रकारः इति प्रसिद्धः मुनिवरः कः? (मुनि नारायणप्रसाद्, भरतमुनिः, पाणिनिमहर्षिः) ............................।

**21 - 25 एकेन पदेन उत्तरं लिखत -** 5 x 1 = 5

21. ए.आर. राजराजवर्मणा विरचितं चरित्रकाव्यं किम्? ............................।

22. 'जयम्' अथवा 'जयसंहिता' इति प्रसिद्धः ग्रन्थः कः? ............................।

23. 'अस्मद् शब्दस्य तृतीया एकवचनरूपं किम्? ............................।

24. "निर्माय कर्मणा श्रीः" - इति ध्येयवाक्यं कस्याः संस्थायाः भवति। ............................।

25. महाविष्णोः चक्रायुधस्य नाम किम्? ............................।

**26 - 30 मञ्जुषातः पदं स्वीकृत्य यथोचितं योजयत -** 5 x 1 = 5

26. यवागुः ............................।
27. वंशः ............................।
28. नौकाकेलिः ............................।
29. लेशः ............................।
30. जानु ............................।

| |
|---|
| किञ्चित् |
| वीणा |
| अवयवः |
| पेयम् |
| कुचेलवृत्तम् |
| वेणुः |

# SANSKRIT SCHOLARSHIP EXAMINATION 2010 - 11

## S.S.U.S. - ACADEMIC & SANSKRIT SCHOOLS - ANSWER KEY

**Std: VII** **Marks: 30**

| | | |
|---|---|---|
| 1. | अहम्। | 1 |
| 2. | बालरामायणम्। | 1 |
| 3. | देवनागरी। | 1 |
| 4. | अक्टोबर् २ | 1 |
| 5. | याज्ञवल्क्यः। | 1 |
| 6. | रघुवंशे। | 1 |
| 7. | नौका। | 1 |
| 8. | स्वामी विवेकानन्दः। | 1 |
| 9. | लीलाशुकेन। | 1 |
| 10. | रबीन्द्रनाथटागूर्। | 1 |
| 11. | मत्स्येन समं क्षीरम्। | 1 |
| 12. | आम्रम्। | 1 |
| 13. | आधिकारिकरेखा। | 1 |
| 14. | पादकन्दुकक्रीडनेन। | 1 |
| 15. | एतत् + मित्रम्। | 1 |
| 16. | एलुत्तच्छन्। | 1 |
| 17. | गीतारहस्यम्। | 1 |
| 18. | शक्तिभद्रः। | 1 |
| 19. | पाणिनीयप्रद्योतम्। | 1 |
| 20. | भरतमुनिः। | 1 |
| 21. | आङ्गलसाम्राज्यम्। | 1 |
| 22. | महाभारतम्। | 1 |
| 23. | मया। | 1 |
| 24. | कालिकट् सर्वकलाशाला। | 1 |
| 25. | सुदर्शनम्। | 1 |
| 26. | पेयम्। | 1 |
| 27. | वेणुः। | 1 |
| 28. | कुचेलवृत्तम्। | 1 |
| 29. | किञ्चित्। | 1 |
| 30. | अवयवः। | 1 |

# SANSKRIT SCHOLARSHIP EXAMINATION 2010 - 11

DPI

ACADEMIC SCHOOLS

Std: VII Reg. No. Time: 1 hr

Marks: 50

1 - 5 समुचितमुत्तरं कोष्ठात् निर्धार्य लिखत - 5 x 1 = 5

1. "दैवदशकम्" इति प्रसिद्धस्य प्रार्थनागीतस्य कर्ता कः?..............................

(श्रीशङ्कराचार्यः, श्रीनारायणगुरुः, श्रीधराचार्यः)

2. अस्मिन् वर्षे वल्लत्तोल् पुरस्कारेण पुरस्कृतः कः? ..............................

(ओ.एन्.वी. कुरुप्, ए. अय्यप्पन्, विष्णुनारायणन् नम्बूतिरिः)

3. "मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव, अतिथिदेवो भव" - प्रसिद्धमिदम् उपनिषद्वाक्यं कस्याः उपनिषदः उद्धृतं भवति? ..............................

(तैत्तिरीयोपनिषदः, कठोपनिषदः, मुण्डकोपनिषदः)

4. अधोदत्तेषु पदेषु अव्ययपदं किम्? ..............................

(विष्णुम्, गन्तुम्, प्रभुम्)

5. "वसुधैव कुटुम्बकम्" अत्र वसुधा शब्दस्य अर्थः कः? ..............................

(अमृतम्, भवनम्, भूमिः)

6 - 7 संशोध्य लिखत - 2 x 1 = 2

6. रमेशः सायङ्काले देवालये अगच्छत्।

..............................................................................।

7. क्षीरस्य समं लवणम् अन्नं च न भोक्तव्यम्।

..............................................................................।

8 - 9 अधो रेखाङ्कितस्य पदच्छेदं लिखत - 2 x 1 = 2

8. कोसलराजः स्वानुचरानवदत्। ..............................।

9. सः जलस्य प्राधान्यम् अधिकृत्यैव वदति।..............................।

10 - 11 प्रदत्तानि वर्णानि सम्यगपि संयुज्य एकं पदं लिखत - 2 x 1 = 2

10. गः लि तौ अ प यो ..............................।

11. कृ [illegible] ..............................।

**12 - 13 संख्याम् अक्षरैः लिखत -**

12. 64 .................................................................................................

13. 101 .................................................................................................

**14 - 15 संख्यारूपेण लिखत -** 2 x 1 = 2

14. सप्तपञ्चाशत्। ........................................ ।

15. एकोननवतिः। ........................................ ।

**16 - 17 स्ववाक्ये योजयतु -** 2 x 1 = 2

16. दृष्ट्वा .................................................................................................।

17. उच्चैः .................................................................................................।

**18 - 19 कोष्ठस्थितस्य पदस्य उचितविभक्तिरूपेण रिक्तस्थानानि पुरयतु -** 2 x 1 = 2

18. सुकन्या .................................. वहिः आगच्छति। (गृहम्)

19. .................................. रचितं खण्डकाव्यमस्ति 'ऋतुसंहारम्'। (कालिदासः)

**20 - 24 यथोचितं योजयत -** 5 x 1 = 5

| | | | |
|---|---|---|---|
| 20. | जिह्वा | आपः | ........................................ । |
| 21. | भरतः | रसना | ........................................ । |
| 22. | जलम् | वाग्भटः | ........................................ । |
| 23. | अष्टाङ्गहृदयम् | नन्दिग्रामः | ........................................ । |
| 24. | कौत्सः | पाणिनिः | ........................................ । |
| | | वरतन्तुः | ........................................ । |

**25 - 29 खण्डिकां पठित्वा अधोदत्तानां प्रश्नानाम् उत्तराणि लिखत -** 5 x 1 = 5

जननी इव उत्कृष्टतरा भवति अस्माकं भूमिः। इयं सर्वलोकेभ्यः शरणप्रदायिनी अस्ति। सर्वविभागानि [illegible] धृत्वा माता इव अस्मान् परिपालयति। [illegible] भवति। सर्वेभ्यः [illegible] पुत्रेभ्यो वायुं जलम्, अन्नम्, सुवर्णम्, धनं च इयं यच्छति। देशभक्ताः जनास्तु [illegible] संरक्षणार्थं स्वप्राणानपि त्यजन्ति। अत एवमुक्तम् "जननी जन्मभूमिश्च [illegible] गरीयसी" - इति।

25. के मातृभूमेः परिपालनार्थं स्वजीवनं त्यजन्ति ?

..............................................................................................................................

26. "स्वर्गादपि गरीयसी" - के गरीयस्यौ ?

..............................................................................................................................

27. माता इव उत्कृष्टतरा का ?

..............................................................................................................................

28. 'स्वर्णम्' इत्यस्य समानार्थकं पदं किम् ?

..............................................................................................................................

29. भूमेः 'धात्री' इति नामान्तरस्य कारणं किम् ?

..............................................................................................................................

**30. जलस्य महत्त्वप्रतिपादकं किमपि सुभाषितं लिखत -** 2 x 1 = 2

..........................................................................................

..........................................................................................।

..........................................................................................

..........................................................................................।।

31 - 35 प्रादेशिकभाषायाम् अनुवदत - 5 x 1 = 5

31. भारतीयसंस्कृतेः वैशिष्ट्यं तस्याः धर्मप्राधान्यम् अस्ति।

..............................................................................................................................।

32. विश्वस्य प्रथमशस्त्रक्रियाकारः इति प्रथितोऽस्ति सुश्रुतः।

..............................................................................................................................।

33. स्वतन्त्रताप्राप्त्यर्थं महात्मागान्धी महान्तं प्रयत्नम् अकरोत्।

..............................................................................................................................।

34. राजर्षिः विश्वामित्रः तपः प्रभावेण ब्रह्मर्षिपदं प्राप्तवान्।

..............................................................................................................................।

35. सर्वेषु अपि ऋतुषु वसन्तर्तुः 'ऋतुराजः' इति कथ्यते।

..............................................................................................................

36. **कोष्ठात् पदानि चित्वा रिक्तस्थानानि पूरयतु -** 4 x 1 = 4

(यदृच्छया, अपि, वीक्ष्य, कश्चित्)

एकदा सायंकाले .................... जम्बुकः ग्रामं गतवान्। सः मार्गमध्ये शुनकान् .................... भयेन प्राणरक्षार्थं समीपस्थं रजकगृहम् अगच्छत्। तत्र स्थापिते नीलजलपूर्णे पात्रे सः .................... अपतत्। अल्पकालानन्तरं सः पात्रात् बहिः निष्क्रान्तः। विचित्रवर्णं तं दृष्ट्वा शुनकाः .................... सुदूरं पलायिताः अभवन्।

**37 - 39 एकं पदं लिखत -** 3 x 1 = 3

37. समं द्रष्टुं शीलम् अस्य ..........................................।

38. जीवति अनेन इति ..........................................।

39. सुमित्रायाः अपत्यं पुमान् ..........................................।

**40 - 41 किं गणे नान्तर्भवति -** 2 x 1 = 2

40. ओदनः, अपूपिका, तक्रम् ..........................................।

41. आगत्य, धर्माय, बालाय ..........................................।

42. **पदप्रश्नं पूरयत -** 5 x 1 = 5

| | | |
|---|---|---|
| 1 स्व | 2 | मि |
| ▨ | | 3 |
| 4 | | धु |
| 5 पू | | |

दक्षिणं प्रति -

1. स्वापं (निद्रां) करोमि इत्यर्थः।

4. न साधु - इत्यस्य एकं पदम्।

5. श्रीकृष्णं हन्तुम् आगता राक्षसी।

अधः -

2. पातुम् इच्छा।

3. 'इदानीम्' इत्यर्थः।

# SANSKRIT SCHOLARSHIP EXAMINATION 2009 - 10

## ACADEMIC SCHOOLS

Std: VII

Time: 1 hr
Marks: 50

1 - 5 समुचितमुत्तरं कोष्ठात् निर्धार्य लिखतु - 1 x 5 = 5

1. अधोदत्तेषु "चिपिटकः" इत्यर्थकं पदं चित्वा लिखतु। ................................
(लाजः, पृथुकः, व्रीहिः)

2. "धर्मोऽस्मत् कुलदैवतम्" - इति ध्येयवाक्यम् एकस्यां मलयालदिनपत्रिकायाम् अस्ति। दिनपत्रिका का? ................................
(मातृभूमिः, मलयालमनोरमा, केरलकौमुदी)

3. "ओस्कार्" - इति प्रसिद्धः पुरस्कारः किमधिकृत्य प्रसिद्धो भवति? ................................
(क्रिक्केट्, चलच्चित्रम्, होक्की)

4. सरस्वत्याः वीणायाः नाम किम्? ................................
(महती, कलावती, कच्छपी)

5. 2009 तमे वर्षे एषुत्तच्छन् पुरस्कारेण पुरस्कृता का? ................................
(डा. एम्. लीलावती, सुगतकुमारी, सारा जोसफ्)

6 - 8 कोष्ठात् उचितं विभक्तिरूपं स्वीकृत्य रिक्तस्थानं पुरयतु - 1 x 3 = 3

6. श्रीकृष्णः ............................ आनीतं चिपिटकं भुक्तवान्। (कुचेलस्य, कुचेलैः, कुचेलेन)

7. ................................ प्रवहती गङ्गा हैमवती इति प्रसिद्धा भवति। (हिमालयम्, हिमालयेन, हिमालयात्)

8. ................................ रचितं गीतं सा गायति। (अहम्, मम, मया)

9 - 10 शोधयत - 1 x 2 = 2

9. अहं मित्रस्य सह विद्यालयं गच्छामि।
................................................................................|

10. शुनकं भीतः मार्जारः पलायते।
................................................................................|

11 - 15 यथोचितं योजयत - 1 x 5 = 5

| | | | |
|---|---|---|---|
| 11. | स्मृतिकारः | ..................................... | सुकुमारकविः। |
| 12. | वज्रायुधम् | ..................................... | समदर्शिनः. |
| 13. | खनितुम् | ..................................... | वररुचिः। |
| 14. | तुषाग्निः | ..................................... | दधीचिः। |
| 15. | पण्डिताः | ..................................... | याज्ञवल्क्यः। |
| | | ..................................... | तुमुन्नन्तम्। |

16-17 प्रदत्तानि सर्वाण्यक्षराणि उपयुज्य एकैकं पदं लिखतु - 1 x 2 = 2

16. का नम् नौ ल चा ................................................................।

17. जः पो क त रा ................................................................।

18-19 अधोरेखाङ्कितस्य पदच्छेदं लिखतु - 1 x 2 = 2

18. धियोऽपि पुंसां मलिनीभवन्ति। ................................................................।

19. शिविर्मांसं प्रदत्तवान्। ................................................................।

20-21 स्ववाक्ये योजयतु - 1 x 2 = 2

20. चेत् - ................................................................।

21. गन्तुम् - ................................................................।

22 - 23 संख्याम् अक्षरैः लिखतु - 1 x 2 = 2

22. 108 ................................................................।

23. 69 ................................................................।

24- 28 खण्डिकां पठित्वा अधोदत्तानां प्रश्नानाम् उत्तराणि लिखतु - 1 x 5 = 5

व्यासेन रचितं बृहत्काव्यमस्ति "जयम्"। महत्वात् भारवत्वात् च काव्यमिदं "महाभारतम्" इत्युच्यते। 'महाभारतम्' इतिहासकाव्यविभागे अन्तर्भवति। काव्येऽस्मिन् अष्टादशपर्वाणि सन्ति। सुप्रसिद्धा भगवद्गीता महाभारते विराजते। व्यासस्य रचनापाटवं जिज्ञासां जनयति। "यतो धर्मस्ततो जयम्" - इति धर्मचिन्ता महाभारते सर्वत्र परिलसति। युद्धस्य परिणामः भीतिजनकोऽस्ति इति व्यासः अनेन काव्येन स्पष्टीकरोति।

24. महाभारतस्य व्यासेन कृतं नाम किम्?

..........................................................................................................

25. महाभारतं कस्मिन् काव्यविभागे अन्तर्भवति?

..........................................................................................................

26. महाभारते सर्वत्र परिलसिता धर्मचिन्ता कः?

..........................................................................................................

27. 'ज्ञातुम् इच्छा' - इत्यस्य समानार्थकपदं खण्डिकातः चित्वा लिखतु।

..........................................................................................................

28. व्यासः महाभारतरचनया किं स्पष्टीकरोति?

..........................................................................................................

29. परोपकारस्य महत्वप्रतिपादकम् एकं सुभाषितं लिखतु - 1 x 2 = 2

..........................................................................................................

..........................................................................................................

..........................................................................................................

..........................................................................................................

30-3 प्रादेशिकभाषायाम् अनुवदतु - 1 x 4 = 4

30. विद्यालयस्य नातिदूरे ग्रन्थशाला अस्ति।

..........................................................................................................।

31. ग्रामीणाः सर्वे स्नेहेन वसन्ति।

..........................................................................................................।

32. भाषासु मुख्या भवति संस्कृतवाणी।

..........................................................................................................।

33. स्वामी विवेकानन्दः अमेरिकादेशे भारतीयसंस्कृत्याः प्रचारम् अकरोत्। ......................

..........................................................................................................।

34. कोष्ठात् पदानि चित्वा रिक्तस्थानानि पूरयतु - 1 x 5 = 5

(अपि, गत्वा, इव, आनीय, पुरा)

.................... रावणे नाम राक्षसराजः आसीत्। सः देवोद्यानं .................... मन्दारप्रमुखान् वृक्षान् अपहृतवान्। तान् वृक्षान् स्वभवनम् .................... अशोकवने संस्थापितवान्। तदारभ्य अशोकवनम् .................... स्वर्गोद्यानम् .................... प्रसिद्धमभवत्।

35 - 36 एकं पदं लिखतु - 1 x 2 = 2

35. दुःखेन लब्धुं शक्यम् ..........................................।

36. समं द्रष्टुं शीलम् अस्य इति ..........................................।

37-39 एकैकेन पदेन उत्तरं लिखतु - 1 x 3 = 3

37. आत्मोपदेशशतकस्य कर्ता कः?

..........................................................................................।

38. स्तोत्रकाव्यरचनया वातरोगात् विमुक्तः केरलीयः कः?

..........................................................................................

39. योगसूत्रकारः इति प्रसिद्धः मुनिवर्यः कः?

..........................................................................................

40. पदप्रश्नं पूरयतु - 1 x 6 = 6

| | | | |
|---|---|---|---|
| 1 का | | नम् | 2 |
| | 3 मा | 4 | तु |
| 5 दा | | शी | |
| | कः | | (shaded) |

अधः -

1. "कविकुलगुरुः" इति प्रसिद्धः कविः।
2. मातुः भ्राता।
3. "मनुष्यः" इत्यर्थः।
4. ८० इति संख्यां संस्कृते एवं वदति।

दक्षिणं प्रति -

1. 'वनम्' इत्यर्थः।

5. कर्णः ............. आसीत्।

# SANSKRIT SCHOLARSHIP EXAMINATION 2009 - 10

## ACADEMIC SCHOOLS

## ANSWER KEY

**Std: VII** **Marks: 50**

| | | |
|---|---|---|
| 1. | पृथुकः। | 1 |
| 2 | मलयालमनोरमा। | 1 |
| 3. | चलच्चित्रम्। | 1 |
| 4. | कच्छपी। | 1 |
| 5. | सुगतकुमारी। | 1 |
| 6. | कुचेलेन। | 1 |
| 7. | हिमालयात्। | 1 |
| 8. | मया। | 1 |
| 9. | अहं मित्रेण सह विद्यालयं गच्छामि। | 1 |
| 10. | शुनकात् भीतः मार्जारः पलायते। | 1 |
| 11. | याज्ञवल्क्यः। | 1 |
| 12. | दधीचिः। | 1 |
| 13. | तुमुन्नन्तम्। | 1 |
| 14. | सुकुमारकविः। | 1 |
| 15. | समदर्शिनः। | 1 |
| 16. | नौकाचालनम्। | 1 |
| 17. | कपोतराजः। | 1 |
| 18. | धियः + अपि। | 1 |
| 19. | शिबिः + मांसम्। | 1 |
| 20. | वाक्यं समीचीनं चेत् पूर्णः अङ्कः। | 1 |
| 21. | वाक्यं समीचीनं चेत् पूर्णः अङ्कः। | 1 |
| 22. | अष्टोत्तरशतम् / अष्टाधिकशतम्।<br>समीचीनस्य अन्यस्यापि पूर्णोऽङ्कः। | 1 |
| 23. | एकोनसप्ततिः / समीचीनस्यान्यस्यापि पूर्णोऽङ्कः। | 1 |
| 24. | महाभारतस्य व्यासेन कृतं नाम जयम् इत्यस्ति। | 2 |

(P.T.O.)

| | | |
|---|---|---|
| 25. | महाभारतम् इतिहासकाव्यविभागेऽन्तर्भवति। | 1 |
| 26. | "यतो धर्मस्ततो जयम्" इति धर्मचिन्ता महाभारते सर्वत्र परिलसन्ति। | 1 |
| 27. | जिज्ञासा। | 1 |
| 28. | युद्धस्य परिणामः भीतिजनकः इति स्पष्टीकरोति। | 1 |
| 29. | सुभाषितं पूर्णं चेत् पूर्णः अङ्कः, अन्यथा योगविभागेन। | 2 |
| 30. | आशयानुवादः उद्दिष्टः। आशयपूर्णः चेत् पूर्णोऽङ्कः। | 1 |
| 31. | आशयानुवादः उद्दिष्टः। आशयपूर्णः चेत् पूर्णोऽङ्कः। | 1 |
| 32. | आशयानुवादः उद्दिष्टः। आशयपूर्णः चेत् पूर्णोऽङ्कः। | 1 |
| 33. | आशयानुवादः उद्दिष्टः। आशयपूर्णः चेत् पूर्णोऽङ्कः। | 1 |
| 34. | पुरा, गत्वा, आनीय, अपि, इव। | 1 x 5 = 5 |
| 35. | दुर्लभम्। | 1 |
| 36. | समदर्शी। | 1 |
| 37. | श्रीनारायणगुरुः। | 1 |
| 38. | मेल्पुत्तूर् नारायणभट्टपादः। | 1 |
| 39. | पतञ्जलिः।। | 1 |
| 40. | अधः - 1. कालिदासः। | 1 |
| | 2. मातुलः। | 1 |
| | 3. मानवः। | 1 |
| | 4. अशीतिः। | |
| | दक्षिणतः - 1. काननम्। | 1 |
| | 2. दानशीलः। | 1 x 6 = 6 |

आ Jyothish E-17-V

# SANSKRIT SCHOLARSHIP EXAMINATION 2008 - 09

## ACADEMIC SCHOOLS

Std: VII

Time: 1 hr
Marks: 50

1 x 6 = 6

1 - 6 समुचितमुत्तरं कोष्ठान्निर्धार्य लिखतु -

1. अधोदत्तेषु 'वारि' इत्यर्थकं पदं चित्वा लिखतु। ................................
(तटिनी, सुधा, कमलम्)

2. कस्य ग्रन्थस्य अपरं नाम भवति 'नामलिङ्गानुशासनम्'? ................................
(धातुप्रपञ्चस्य, अमरकोशस्य, अष्टाध्याय्याः)

3. योगदर्शनस्य उपज्ञाता कः? ................................
(गौतमः, पतञ्जलिः, कपिलः)

4. सप्तस्वरेषु अन्यतमः भवति ................................
(ऋषभः, शृङ्गारः, शब्दः)

5. अधः प्रदत्तेषु केरलीयः समाजपरिष्कर्ता कः? ................................
(श्रीरामकृष्णपरमहंसः, स्वामी विवेकानन्दः, श्रीनारायणगुरुः)

6. लतिका .............. सह चलचित्रं द्रष्टुं गच्छति। रिक्तस्थाने पदम्? ................................
(पित्रा, पितरं, पितुः)

1 x 5 = 5

7 - 11 यथोचितं योजयतु -

| | | |
|---|---|---|
| | | त्यक्त्वा। |
| 7. नौकागानम् | ................................ | दधीचिः। 10 |
| 8. चरकसंहिता | ................................ | विष्णुशर्मा। |
| 9. क्त्वान्तम् | ................................ | नारायणशर्मा। |
| 10. अस्थीनि | ................................ | रामपुरत्तुवारियर्। 7 |
| 11. पञ्चतन्त्रम् | ................................ | आयुर्वेदग्रन्थः। |

1 x 2 = 2

12-13 स्ववाक्ये योजयतु -

12. बहिः ................................................................

13. विना ................................................................

1 x 2 = 2

14 - 15 संख्याम् अक्षरैः लिखतु -

14. 265 ..........................................................................

15. 99 ..........................................................................

1 x 2 = 2

16-17 प्रदत्तानि सर्वाणि अक्षराणि उपयुज्य एकैकं पदं लिखतु -

16. व तम् न ल गी ..........................................................................

17. पा य वा त्रम् गू ..........................................................................

1 x 5 = 5

18-22 एकैकेन पदेन उत्तरयतु -

18. अर्थशास्त्रस्य कर्ता कः?

..........................................................................

19. 2008 तमे वर्षे 'ज्ञानप्पाना' पुरस्कारेण आदृता कवयित्री का?

..........................................................................

20. अस्माकं राष्ट्रियनदी का?

..........................................................................

21. भारतस्य देशीयकायिकविनोदः कः?


..........................................................................

22. भगवद्गीतायां कति अध्यायाः सन्ति?

..........................................................................

1 x 5 = 5

23. चित्रं निरीक्ष्य पञ्चवाक्यानि लिखतु -



..................................................................................................................

..................................................................................................................

..................................................................................................................

..................................................................................................................

..................................................................................................................

24. **उदारतायाः** महत्त्वप्रतिपादकं सुभाषितमेकं लिखतु - 2 x 1 = 2

..................................................................................................................

..................................................................................................................

..................................................................................................................

..................................................................................................................

25 - 29 प्रादेशिकभाषया अनुवदतु - 1 x 5 = 5

25. सायंकाले बालाः क्रीडाङ्कणे मिलन्ति।

..................................................................................................................

26. विद्युद्दीपाः प्रकाशं विकिरन्ति।

..................................................................................................................

27. मम ग्रामे अनेकाः कुल्याः सन्ति।

..................................................................................................................

28. सः वृक्षात् पतितं फलं खादति।

..................................................................................................................

29. वस्त्रक्षालनं गृहमार्जनं च यन्त्रैः कर्तुं शक्यते।

..................................................................................................................

30. मञ्जूषातः पदानि चित्वा वाक्यानि पूरयतु - 1 x 4 = 4

.................... राजशेखरः विरामसमये उपवनम् अगच्छत्। तत् नानाविधैः फलितैः पादपैः आकर्षणीयम् आसीत्। तत् .................... सः अतुष्यत्। राजशेखरः आम्रवृक्षस्य समीपं .................... तम् .................... ऐच्छत्।

(गत्वा, तदा, वीक्ष्य, तथापि, आरोढुम्, एकदा)

31- 35 खण्डिकां पठित्वा प्रश्नानाम् उत्तराणि लिखतु - 1 x 5 = 5

प्रकृतिः मनुष्यस्य उपकारिणी भवति। मनुष्यैः सह तस्याः शाश्वतः सम्बन्धः अस्ति। सा विविधरूपेषु अस्मिन् जगति आत्मानं प्रकटयति। पशवः पक्षिणः वनस्पतयश्च तस्याः एव अङ्गानि। एषा भूमिः सस्यश्यामला भवति। सा सौन्दर्येण नीरसं हृदयमपि सरसं करोति। विविधाः ओषधयः सकलानि खनिजानि च प्रकृतेः शोभां वर्धयन्ति। नरः शाश्वतं सुखं वाञ्छति चेत् प्रकृतेः प्रतिकूलतां नाचरेत्।

31. प्रकृतेः अङ्गानि कानि?

..........................................................................................................

32. प्रकृतिः नीरसं हृदयमपि सरसं करोति। केन?

..........................................................................................................

33. 'वनस्पतयश्च' अस्य पदच्छेदं लिखतु।

..........................................................................................................

34. नरः शाश्वतं सुखं वाञ्छति चेत् किं नाचरेत्?

..........................................................................................................

35. 'लोक' इत्यर्थकं पदं खण्डिकातः चित्वा लिखतु?

..........................................................................................................

36. पदप्रश्नं पूरयतु - 1 x 7 = 7

| | | | |
|---|---|---|---|
| मृ 1 | - | ये | _ 2 |
| 3 _ | रु | _ | कु |
| रा | 4 _ | चे | _ |
| _ | क्षिः | _ 5 | हिः |

**अधः -**

1. मृगाणां राजा।
2. एषः सर्पाणां शत्रुः भवति
4. 'उदरम्' इत्यर्थकं पदम्।

**दक्षिणं प्रति -**

1. रघुः अनेन पात्रेण कौत्सं स्वीचकार।
3. एषः पक्षिराजःच भवति।
4. श्रीकृष्णस्य मित्रम्।
5. 'कुट्टनाट्' देशस्य मुख्यकृषिः।

Jyothish

# SANSKRIT SCHOLARSHIP EXAMINATION 2005-06

(Academic Schools)

Std. VII

Time : 1 hr.
Marks : 50

½ x 10 = 5

**1 - 10 समुचितमुत्तरं कोष्ठान्निर्धार्य लिखत**

1. वाल्मीकिप्रणीतस्य रामायणस्य संक्षिप्तरूपं भवति - ?
(श्रीकृष्णविलासम्, श्रीरामोदन्तम्, श्रीमत् भागवतम्) ..................................

2. 'केरदिनं' केषां प्रोत्साहनाय भवति ?
(पण्डितानां, बालानां, कृषकाणां) ..................................

3. कुञ्चिक्कुट्टन् तम्पुरान् केन नाम्ना प्रथितः ?
(केरलपाणिनिः, केरलव्यासः, केरलकालिदासः) ..................................

4. "नेत्रत्रयमस्ति तथापि सोऽन्धः।" कोऽयम् ?
(नारिकेलम्, दीपः, परमेश्वरः) ..................................

5. कः गणे नान्तर्भवति ?
(लड्डुकं, कुण्डलिका, मरिचम्) ..................................

6. 'बाल्य एव' अस्य पदच्छेदः ?
(बाल्ये + एव, बालय + एव, बाल्यः + एव) ..................................

7. अधोदत्तेषु अव्ययं किम् ?
(दानाय, विहाय, लाभाय) ..................................

8. अधः प्रदत्तेषु इतिहासकाव्यं किम् ?
(महाभारतम्, नारायणीयम्, भागवतम्) ..................................

9. श्रीशङ्करस्य जन्मदेशः ?
(शिवगिरिः, कालटिः, तृश्शिवपुरम्) ..................................

10. कति वेदाङ्गानि सन्ति ?
(चत्वारः, अष्ट, षट्) ..................................

1 x 5 = 5

11-15 यथोचितं योजयत

| | | |
|---|---|---|
| 11. विष्णुशर्मा | .............................. | कैकेयी |
| 12. प्लवगः | .............................. | पातुम् |
| 13. सार्वजनिकस्थानं | .............................. | गृहोपकरणम् |
| 14. वरद्वयं | .............................. | पञ्चतन्त्रम् |
| 15. तुमुन्नन्तम् | .............................. | आतुरालयः |
| | | वानरः |

16. पदप्रश्नं पूरयत

½ x 8 = 4

| 1 गु | – | 2 ध | 3 – |
|---|---|---|---|
| – | 4 – | 5 पि | मः |
| – | लि | 6 – | णिः |
| लम् | – | 7 सा | – |

अधः

1. पुरा छात्राः अध्ययनाय अत्र अध्यवसन् ।
3. दशरथपुत्रः ।
4. जीवने अत्यन्तापेक्षितं भवति इदं ।
5. पातुम् इच्छा

दक्षिणतः

1. श्रृङ्गिवेरपुरस्य राजा ।
2. भूमीः इत्यर्थकं पदम् ।
6. अयं दानेन विभाति ।
7. ——— वेदः संगीतप्रधानः ।

17-18 स्ववाक्ये योजयत

1 x 2 = 2

17. प्रभूतम् ..............................................................

18. परितः ..............................................................

19-20 संख्याम् अक्षरैः लिखत

1 x 2 = 2

19. 95 ..............................................................

20. 81 ..............................................................

21-22 दत्तानि अक्षराणि सर्वाणि उपयुज्य एकैकं पदं लिखत

1 x 2 = 2

21.

| नं | सा | न्त | य |
|---|---|---|---|

..............................................................

22.

| रो | का | प | रः | प |
|---|---|---|---|---|

..............................................................

23. प्रतिपट्टिकम् एकैकं पदं स्वीकृत्य पञ्चवाक्यानि लिखत

1 x 5 = 5

| | | | |
|---|---|---|---|
| शिशुः | पठनाय | औषधं | आनयन्ति |
| विद्यालयस्य | चषकेन | जलं | पिबति |
| माता | कूपात् | उद्यानं | ददाति |
| वयं | पुत्राय | नगरं | गच्छामः |
| वनिताः | पुरतः | क्षीरं | अस्ति |

..............................................................

..............................................................

..............................................................

..............................................................

..............................................................

24. परोपकारस्य महत्वप्रतिपादकं सुभाषितमेकं लिखत 1 x 2 = 2

.....................................................................................................

.....................................................................................................

.....................................................................................................

.....................................................................................................

25-29 एकैकेन पदेन उत्तरयत 1 x 5 = 5

25. महाभारतस्य कर्ता कः? ........................................................

26. कालिदासविरचितं सुप्रसिद्धं नाटकम्? ........................................................

27. अस्माकं राष्ट्रपतिः कः? ........................................................

28. केरलराज्यस्य देशीयपुष्पं किम्? ........................................................

29. आध्यात्मिककार्येषु विवेकानन्दस्य गुरुः? ........................................................

30. सम्भाषणांशान् पूरयत 1 x 2 = 2

गीता : ........................................................................................

लता : अहं पुस्तकालयात् आगच्छामि ।

गीता : ........................................................................................

लता : अनुसन्धानपद्धतेः विवरसमाहरणाय ।

31. श्लोकस्य आशयं लिखत 2

शुनः पुच्छमिव व्यर्थं जीवितं विद्यया विना ।
न गुह्यगोपने शक्तं न च दंशनिवारणे ।।

.....................................................................................................

.....................................................................................................

.....................................................................................................

.....................................................................................................

32-36 खण्डिकां पठित्वा प्रश्नानाम् उत्तराणि लिखत 1 x 5 = 5

कस्मिंश्चित् ग्रामे माण्डव्यः नाम कश्चन ब्राह्मणः वसति स्म। सः सर्वधर्मज्ञः धैर्ययुक्तः च आसीत्। एकदा सः आश्रमद्वारे वृक्षस्य अधः मौनव्रतम् आचरन् अतिष्ठत्। तदा तत्र रक्षिपुरुषैः अनुगताः केचित् चोराः आश्रमं प्राप्ताः । चोराः तु अपहतानि वस्तूनि माण्डव्यस्य समीपे एव निधाय भयाद् दूरं पलायिताः।

32. माण्डव्यः कः आसीत् ? ........................................................

33. कः मौनव्रतम् आचरन् अतिष्ठत्? ........................................................

34. माण्डव्यः कीदृशः आसीत् ? ..........................................................

35. चोराः कैः अनुगताः ? ..........................................................

36. के भयात् दूरं पलायिताः ? ..........................................................

37-41 प्रादेशिकभाषायाम् अनुवदत 1 x 5 = 5

37. वृक्षस्य उपरि बहवः बकाः सन्ति ।

..........................................................................................................................................

38. युवयोः पिता कस्मिन् कार्यालये भवति?

..........................................................................................................................................

39. छात्राः बस्यानात् विद्यालयद्वारे अवतरन्ति ।

..........................................................................................................................................

40. नगरं सर्वतः यात्रिकाः सञ्चरन्ति ।

..........................................................................................................................................

41. भारतस्य उत्तरस्यां दिशि हिमालयः अस्ति ।

..........................................................................................................................................

42. **परिस्थितिसंरक्षणम्** अधिकृत्य लघुखण्डिकाम् एकां लिखत 4

..........................................................................................................................................

..........................................................................................................................................

..........................................................................................................................................

..........................................................................................................................................

..........................................................................................................................................

*****

Jyothish

# SANSKRIT SCHOLARSHIP EXAMINATION 2004 - 05

## ACADEMIC SCHOOLS

Std: VII

Time: 1 hr
Marks: 50

1 - 10 समुचितमुत्तरं कोष्ठान्निर्धार्य लिखत - ½ x 10 = 5

1. महाभारते कति पर्वाणि सन्ति? अष्टादश
(षोडश, सप्तदश, अष्टादश)

2. आधुनिककवित्रयेषु अन्यतमः कः? कुमारनाशान्
(कुमारनाशान्, तुञ्चत्तु एलुत्तच्छन्, अक्कित्तम्)

3. पञ्चतन्त्रस्य कर्ता कः? विष्णुशर्मा
(विष्णुदासः, विष्णुगुप्तः, विष्णुशर्मा)

4. "अन्यस्य दशति श्रोत्रमन्यः प्राणैर्वियुज्यते" - कः एवमाचरति? दुर्जनः
(दुर्जनः, सर्पः, मारुतः)

5. मातुः भ्राता मातुलः भवति। पितुः भ्राता कः? पितृव्यः
(पितरः, पितृव्यः, पितामहः)

6. 'व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात्' - कस्य स्वभावः उक्तम्? विद्यायाः
(सम्पदः, तेजसः, विद्यायाः)

7. केरलराज्यपालः कः? आर्. एल्. भाटिया
(आर्.एल्. भाटिय, सिक्कन्दरभक्त, उम्मन् चाण्डी)

8. कः गणे नान्तर्भवति स्वप्नवासवदत्तम्
(स्वप्नवासवदत्तम्, रघुवंशम्, किरातार्जुनीयम्)

9. श्रीशङ्करसंस्कृतसर्वकलाशालायाः आस्थानं कस्यां जिल्लायां वर्तते? एरणाकुलम्
(कण्णूर्, तिरुवनन्तपुरम्, एरणाकुलम्)

10. केरलवाल्मीकिः इति प्रसिद्धः कः? वल्लत्तोल्
(कुञ्चन् नम्पियार्, वल्लत्तोल्, उल्लूर्)

11 - 15 यथोचितं योजयत - 1 x 5 = 5

11. मेल्पत्तूर — नारायणीयम् ........ श्रीनारायणगुरुदेवः 13
12. भारतसञ्चारनिगमः — अहर्निशं सेवामहे ........ भगवद्गीता 15
13. वर्कला — श्रीनारायणगुरुदेवः ........ नारायणीयम् 11
14. निलीय — ल्यबन्तमव्ययम् ........ अहर्निशं सेवामहे 12
15. महाभारतम् — भगवद्गीता ........ ल्यबन्तमव्ययम् 14
........ ऋग्वेदः

16. पदप्रश्नं पूरयत -

| | | | |
|---|---|---|---|
| का1 | | | दि5 |
| 2 | श4 | | |
| | | | |
| नु: | म | 3 | र: |

दक्षिणतः 1 x 6 = 6

1. कौसल्यायाः पुत्रः (त्र्यक्षरी)
2. रात्रौ अस्य उपद्रवो भवेत्। (त्र्यक्षरी)
3. कश्चन जलजीवी (त्र्यक्षरी)

अधः

1. अभीष्टदा गौः
5. रिपुः इत्यर्थकं पदम्
4. सर्वेषां तेजसां प्रभवः।

2

17. स्ववाक्ये योजयत -

यथा..... तथा ..............................................................

यत्र.......तत्र ..............................................................

3

18. संख्याम् अक्षरैः लिखत -

25 ..............................................................

95 ..............................................................

47 ..............................................................

2

19. दत्तानि अक्षराणि सर्वाणि उपयुज्य एकैकं पदं लिखत -

रि चा कः र प ........ परिचारकः

गः त चि प त्र ........ चित्रपतंगः

1 x 5 = 5

20. कोष्ठकेषु प्रदत्तानि पदानि उपयुज्य पञ्च वाक्यानि लिखत-

| | | | |
|---|---|---|---|
| कृषकः<br>त्वं<br>वयं | ह्यः<br>श्वः | उद्यानं<br>केदारं<br>क्षीरं | गमिष्यति<br>पास्यामः<br>आगच्छाम<br>गमिष्यसि<br>अपिबाम<br>अपिबः |

1. ..............................................................
2. ..............................................................
3. ..............................................................
4. ..............................................................
5 ..............................................................

21. विद्यायाः महत्वप्रतिपादकं किमपि सुभाषितम् लिखत -

..........................................................................

..........................................................................

..........................................................................

..........................................................................

22 - 27 पदेनैकेन उत्तरयत -

1 × 6 = 6

22 कालिदासेन रचितं सन्देशकाव्यम् किम् ? ........ मेघसन्देशम्

23. ज्ञातुम् इच्छा - अस्य एकं पदम् किम् ? ........ जिज्ञासा

24. 'तन्त्रिनेत्रं प्रणमाम्यहम्' - कविः कम् प्रणमति ? ........ शिवम् ........

25. वृक्षस्याग्रे फलं दृष्टं फलाग्रे वृक्षमेव च - किं तत् ? ........ अनानस

26. केरलराज्यस्य वित्तसचिवः कः ? ........ वक्कम् पुरुषोत्तमन् ........

27. शिशुपालवधाख्यस्य महाकाव्यस्य कर्ता कः ? ........ माघः ........

28. रिक्तान् सम्भाषणांशान् पूरयत -

2

लता - अयि मीरे! आगच्छ। देवीमन्दिरं गमिष्यावः।

मीरा - ..........................................?

लता - कुतः नागमिष्यसि ?

मीरा - ..........................................?

29- 33 खण्डिकां पठित्वा प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत।

1 × 5 = 5

श्रीरामकृष्णः पश्चिमवङ्गेषु जनिमलभत। तस्य पिता क्षुदिरामः माता चन्द्रमणी चास्ताम्। पिता तस्य गदाधरः इति नाम अकरोत्। पञ्चमे वयसि शिक्षायै सः विद्यालयमगच्छत्। ततः सः संस्कृतञ्च अपठत्। पठनानन्तरं सप्तदशवर्षाणि यावत् कस्मिन्नपि देवीमन्दिरे अर्चकः अभवत् गदाधरः। तदा सः रामकृष्णः इति नाम स्वयं स्वीकृतवान् च।

29. श्रीरामकृष्णः कुत्र जन्म अलभत ? ........ श्रीरामकृष्णः पश्चिमवङ्गेषु जनिमलभत।

30. तस्य पूर्वनाम किमासीत् ? ........ तस्य पूर्वनाम गदाधर आसी

31. सः कदा विद्यालयमगच्छत् ? ........ पञ्चमे वयसि शिक्षायैः सः विद्यालयमगच्छत्।

32. तस्य रामकृष्णः इति नाम कथम् अजायत ? ..........................................

33. अध्ययनाय इत्यर्थकं पदम् खण्डिकातः विविच्य लिखत। ..........................................

34. श्लोकस्य आशयं मातृभाषया लिखत - 2

नास्ति लोभसमो व्याधिः
नास्ति क्रोधसमो रिपुः।
नास्ति दारिद्र्यवद् दुःखम्
नास्ति ज्ञानात् परं सुखम्।

..............................................................................................................

..............................................................................................................

..............................................................................................................

35. प्रादेशिकभाषायाम् अनुवदत - 1 x 5 = 5

1. मम गृहं नगरे वर्तते। ..............................................................................

2. केरलस्य राजधानी अनन्तपुरी भवति। ..........................................................

3. प्रतिवर्षं डिसम्बर् मासे क्रिस्मस् आघुष्यते। ...................................................

4. तव उत्तमं मित्रं किम्? .............................................................................

5. सर्वाः बालिकाः उद्यानं व्रजन्ति। ..................................................................